श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवरवरमुनिभिरनुगृहीतं

# ॥ मुक्तकमङ्गलम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ मुक्तकमङ्गलम् ॥

श्रीशैलेशदयापात्रं धीभक्त्यादिगुणार्णवम्।
यतीन्द्रप्रवणं वन्दे रम्यजामातरं मुनिम्॥

लक्ष्मीचरणलाक्षाङ्कसाक्षि श्रीवत्सवक्षसे।
क्षेमङ्कराय सर्वेषां श्रीरङ्गेशाय मङ्गलम्॥ **1** ॥

श्रियःकान्ताय कल्याणनिधये निधयेऽर्थिनाम्।
श्रीवेङ्कटनिवासाय श्रीनिवासाय मङ्गलम्॥ **2** ॥

अस्तु श्रीस्तनकस्तूरीवासनावासितोरसे।
श्रीहस्तिगिरिनाथाय देवराजाय मङ्गलम्॥ **3** ॥

कमलाकुचकस्तूरीकर्दमाङ्कितवक्षसे।
यादवाद्रिनिवासाय सम्पत्पुत्राय मङ्गलम्॥ **4** ॥

श्रीनगर्यां महापुर्यां ताम्रपर्ण्युत्तरे तटे।
श्रीतिन्त्रिणीमूलधाम्ने शठकोपाय मङ्गलम्॥ **5** ॥

श्रीमत्यै विष्णुचित्तार्यमनोनन्दनहेतवे।
नन्दनन्दनसुन्दर्यै गोदायै नित्यमङ्गलम्॥ **6** ॥

श्रीमन्महाभूतपुरे श्रीमत्केशवयज्वनः।
कान्तिमत्यां प्रसूताय यतिराजाय मङ्गलम्॥ **7** ॥

मङ्गलाशासनपरैः मदाचर्यपुरोगमैः।
सर्वैश्च पूर्वैराचार्यैः सत्कृतायास्तु मङ्गलम्॥ **8** ॥

॥ इति मुक्तकमङ्गलम् समाप्तम् ॥